International Journal of Sanskrit Research 2015; 1(5): 17-21

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(5): 17-21
© 2015 IJSR
www.sanskritjournal.com
Received: 15-06-2015
Accepted: 17-07-2015

**Debashis Panigrahi**
PH.D. Research Scholar,
Dept. of Sanskrit, Pondicherry University, Kalapet,
Pondicherry – 605014



**Debashis Panigrahi**

**Correspondence**
**Debashis Panigrahi**
PH.D. Research Scholar,
Dept. of Sanskrit, Pondicherry University, Kalapet,
Pondicherry – 605014

# सांख्यदर्शने वर्णितं अतिवाहिकदेहस्य परिचयं स्थिति गति चोपरि सामान्यमावलोकनम्

**Debashis Panigrahi**

**Abstract**
सांख्यदर्शने प्रकृति-पुरुषः, गुणत्रयः, विवेकज्ञानादि अनेके विषयाः चर्चिताः अस्ति । तन्मध्येषु अतिवाहिकदेहस्य विषयः अन्यतमः । जीवस्य मृत्युः जाते पुरातनशरीरं परित्येज्यं नूतनशरीरं कर्मपाशात् प्राप्नोति । तस्मिन् सन्धिसमये जीवः वासनाजन्यं आवेशात् एकं शरीरमाप्नोति, यत् अतिवाहिकदेहः प्रेतयोनि वा इति नाम्ना कथ्यते । अयमात्मनः एतादृशमेकमावस्था यत्र सः जीवः वहुकष्टं लभते । प्रकृति सदैव परिणामी भवति तस्मात् कारणात् यदि केन प्रकारेण जीवस्य स्थुलशरीरः नष्टं जायते, तर्हि पुनः तस्य भवानुसारं एकं नूतनशरीरं तं ददाति । जीवस्य गति पुण्यापुण्याकर्मानुसारं लोकान्तरं गति भवति । अयं तावत् पर्यन्तं प्रचलिष्यति यावत् पर्यन्तं विवेकज्ञान नोदेति, अन्यथा चक्रभ्रमणवद्-धृतशरीरेति सांख्यन्यायानुसारं अनन्तकालः पर्यन्तं प्रचलिष्यति ।

**Keywords:** अतिवाहिकदेहः, कर्म, प्रेतयोनि, स्थूलशरीरः, लोकोत्तरगति ।

## परिचयम्

भारतीयदर्शनेषु सांख्यदर्शनः अन्यतमः । पञ्चविंशतितत्त्वानां सम्यक् चर्चा यं शास्त्रे क्रियते तत् सांख्यशास्त्रः इति रूपे ख्यातः । अस्मिन् दर्शने मूलतत्त्वानां विचारः समये अन्यापि कानिचन विषयाः अपि आयान्ति । तन्मध्येषु अतिवाहिकदेहः एकैव । यद्यपि लिङ्गशरीरः कारणशरीरः आदि विषया तत्र उपस्थाप्यते तथापि अतिवाहिकदेहस्य विषयस्य महत्त्वं वहु अस्ति । सम्प्रति युगे लौकिककाले च जीवानां मनसि सद्यःमृत्यु प्राप्तजीवानां का गति भवति तस्मिन् विषये वहुधाः मताः दृश्यते । केचन वदन्ति मृत्योरनन्तरमपि ते इतस्ततः भ्रमन्ति, केचन वदन्ति ते अपरलोकः यान्ति एवं अन्ये च तेषां स्थितिः विषये शंका प्रकटयन्ति । अस्मिन् विषये स्पष्टीकुर्वन् सांख्यदर्शने अतिवाहिकदेहः इति विषयः दीयते । यत् ज्ञात्वा पाठकाश्रोताश्च शान्तं अनुभवन्ति ।

### अतिवाहिकदेहस्य परिचयम्

विदितं यत् प्रकृतिः परिणामिनी भवति । सर्वदा प्रतिक्षणं परिणमति । जीवस्य कर्मानुसारं परिणामेन ईप्सितं कार्यरूपं प्रस्तौति इति कारिकायाम् –

भेदानां परिणामात् समन्वयात् शक्तितः प्रवृत्तेश्च [1] ।।

उत्पत्तिकाले सत एव कार्यस्य कारणसकारणाविर्भावात् इति, अतः कारणेन कार्यस्य स्थितिर्गृह्यते । मनुष्यः यतः कर्म करोति ततः कार्यरूपी फलं प्राप्नोति । स कर्मविशेषः शुक्लः कृष्णो वा भवतु तस्य भोगऽवश्यंभावी जीवानां कृतः इत्याशयः ।

उपभोगादितरस्वः [2] ।।

अस्य सुत्रस्यायमर्थः यत् - अविवेकीजीवानां कृते स्वीयकर्मणः भोगो निश्चितः स्यात् । तस्मात्

कारणात् प्रकृतिः पुनः पुनः शरीरं ददाति । प्रकृतेः परिणामित्वविषये सूत्र उक्तम् –

रागविरागयोर्योगः सृष्टिः [3] ।।

संसारे जीवस्य यदि रागभावः भवति तर्हि पुनः संसारबन्धः प्राप्यते इति सूत्रार्थः । माता पिता भातृजाया संतानं बन्धुबान्धवाः इति सर्वं रागात्मकं भवति । तेषां विषये चिन्तनेन मनसि रागो जायते । एवं तद्रागकारणात् पुनर्जीवो जायते । एतादृशरागकारणात् रजोगुणेन तमोगुणेन च आबद्धो जीवोधर्मज्ञानवैराग्यैश्वर्यादिविपरीतं अधर्मकार्यं करोति ।

महदुपरागाद्विपरीतम् [4] ।।

तत्परिणामेन कदाचित् स्थूलशरीरं कदाचिच्च सूक्ष्मशरीरं अतिवाहिकदेहो लभते । मृत्युकाले यदा आत्मा स्थूलशरीरं त्यजति तदा सः अतिवाहिकदेहं गृहित्वा यथासमयं भोगदेहं प्राप्नोति । सः प्रेतामापि कथ्यते । इदं तु प्रसिद्धं यत् - प्रेतनिमित्तं अन्नजलयोरर्पणकाले उच्यते –

आकाशस्थो निरालम्बो वायुभूतो निराश्रयः ।
इदं नीरमिदं क्षीरं स्नात्वा पीत्वा सुखी भव [5] ।।

परलोकगतस्य आत्मनः वायुपूर्णाकाशस्य कारणात् तेषां देहो वायव्यदेहो भवति । स्थूलेन्द्रियैः सः द्रष्टुं न शक्तो भवति । अतस्तेषां स्थितिविषये उपादानविषये च मतभेदो भवति । परन्त्वस्मिन् प्रसङ्गे विष्णुधर्मोत्तरपुराणस्य मतं श्रेष्ठमिति, मन्यते ।

तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम् ।
ऊर्ध्वं ब्रजन्ति भूतानि त्रीण्यस्मात् तस्य विग्रहात् ।।
अतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव ।
केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित् [6] ।।

एतादृशस्य सूक्ष्मरूपस्य अतिवाहिकदेहसंज्ञा । इदं मनुष्याणां केवलं संभवति न तु पशुपक्षीप्रभृतीनाम् । साधारणतया प्रेतदेहकथनेनेदमेव सूच्यते । एतद्देहानन्तरं भोगदेहं स लभते । मृत्योरनन्तरं षोडश्राद्धावसरे यत् पिण्डप्रदानं कुर्वन्ति तस्य पिण्डस्य परमाण्वंशेन भोगदेहो जायते । पिण्डदानेनातिवाहिकशरीरनिर्माणं संभवति । तस्य प्रतिपादनायोच्यते –

शिरस्याद्येन पिण्डेन प्रेतस्य क्रियते सदा ।
द्वितीयेन तु कर्णाक्षिनासिकाश्च समासतः ।।
गलांसभूजवक्षांसि तृतीयेन यथाक्रमात् ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ।।
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्वदा ।
सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः ।।
दन्तलोमाद्यष्टमेन वीर्यं तु नवमेन च ।
दशमेन पूर्णत्वं तृप्तता क्षुद्विपर्ययः [7] ।।

एतादृशः मनुष्यः मरणान्तरं अतिवाहिकदेहं लभते । दशसु अहसु संपूर्णशरीरस्य निर्माणं भवति । दाहकाले दशदिनपर्यन्तं यत् पिण्डं दीयते तत् परिणामतः भोगदेहो जायते । एतन्मतेन तु प्रथमम् अतिवाहिकदेहः ततः परं भोगदेहो भवति ।

सांख्यदर्शने अतिवाहिकदेहस्य प्रमाणम्

सांख्यद्रशने पञ्चविंशतितत्त्वानां विचारावसरे बहवो विषयाश्चर्चिताः । द्विविधशरीरविषये उच्यते –

मातापितृजं स्थूलं प्रायश इतरन्न तथा [8] ।।

केवलं मातृपित्रोरूभयोः मिलनं यः सन्तानो जायते तस्य स्थूलशरीरं भवति । सूक्ष्मशरीरं तथा न भवति । स्थूलशरीरं पाञ्चभिः भूतैः निर्मितं मन्यते । “ पाञ्चभौतिकदेहः” [9] परन्तु सूक्ष्मशरीरं सर्गादिकालात् जायते । “ स्वर्गाद्युत्पन्नत्वात्” [10] । अतिवाहिकदेहविषये सांख्यदर्शने स्पष्टतया कथ्यते यत् –

न स्थूलमिति नियम अतिवाहिकस्यापि विद्यमानत्वात् [11] ।।

संसारे सर्वत्र स्थूलशरीरमेव विद्यते इति नियमः । कदाचित् अप्रत्यक्षेऽपि बहवो विषयास्तिष्ठन्ति । , “ न रूपनिबन्धनात् प्रत्यक्षनियमः” [12] । अस्मिन् सूत्रे प्रत्यक्षस्य वस्तुनः निराकरणं कृत्वा अनुमानप्रमाणमाध्यमेनापि बहवोविषयाः साधिताः । सूक्ष्मातिवाहिकदेहस्याप्रत्यक्षत्वेऽपि तस्य स्थितिर्वर्तते इति स्पष्टीक्रियते । अतिवाहिकदेहस्य उपादानविषये शास्त्रेषु बहुषु मतभेदाः लभ्यन्ते । केचन तद्देहे पृथिवीजलतत्त्वयोरभावं मन्वते । केचन गुरूत्वादिविशिष्टरूपेण मतं पोषयन्ति । सांख्यदर्शने अस्य उपादानविषये उच्यते –

कदाचिद् वायवीयशरीरप्रवेशतो गमनकालेऽपि भोगो भवति [13] ।।

अयं अतिवाहिकदेहस्तु वायवीयो भवति । अतः मृत्योरनन्तरं आत्मा अतिवाहिकदेहरूपिणं वायवीयतत्त्व धारयित्वा गगने भ्रमति । अस्मिन् विषये मनुना उक्तम् –

यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट् ।
तस्माच्छशरीरमित्याहुस्तस्य मूर्तिं मनीषिण [14] ।।

प्रकृतियुक्तानि इन्द्रियाणि कर्मभावेन यदाश्रयन्ति तदेव शरीरं भवति । तत्तु सूक्ष्मरूपे सूक्ष्मशरीरं स्थूलरूपे स्थूलशरीरं च भवति । जीवस्य मृत्युरनन्तरं सूक्ष्मशरीररूपी अतिवाहिकदेहः आत्मा लोकान्तरं नयति इति – “ लोकात् लोकान्तरं लिङ्गदेहः अतिवाहयति इति अतिवाहिकम् ” [15] । अतिवाहिकदेहस्य स्थितिः अन्यत्रापि स्वीक्रियते । “ एवमतिवाहिकं सूक्ष्मशरीरमिन्द्रियाणां धारणप्रायणसमर्थं सत् परिवेष्ट्यते परित्यज्यते च ” [16] । अतिवाहिकदेहस्य कर्मप्रभावेण लोके तथा लोकन्तरे पुनः पुनः शरीरधारणमेव जीवस्य पुनर्जन्म भवति ।

अतिवाहिकदेहस्य स्थुलशरीरः प्राप्ति

अतिवाहिकदेहः कदाचित् जीवस्य आत्मा इति नाम्ना कथ्यते । अस्य तत्त्वस्य न कदापि क्षयो भवति । इदं शरीरं कालबलेन कर्मसंस्कारात् स्थूलशरीररूपेण परिणमति । तस्मिन् विषये उच्यते –

अशरीरं शरीरेषु अनवस्थेष्वस्थितम् [17] ।।

परिवर्तनशीलं अनित्यं स्थूलशरीरं अन्तेकाले सूक्ष्मरूपेण स्वभावरहिततया च तिष्ठति । एतस्य परिवर्तनं नैव जायते । अयमात्मा सूक्ष्मतत्त्वेन जातः तस्मात् कारणात् स्थूलेन नाशं कर्तुं न शक्नोति । तदर्थमुच्यते –

न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न बभूव कश्चित् ।
अजो नित्यः शास्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे [18] ।।

अतः अतिवाहिकस्य विकृतिः नैव संभवति । अतः प्राप्ते मृत्युकाले शरीरं त्यक्त्वा पुनः नवशरीरं प्रविशत्यात्मा । सूक्ष्मात्मनः चैतन्यत्वे प्रमाणपूर्वकमुच्यते –

प्रपञ्चमरणाद्यभावश्च [19] ।।

अत्रोच्यते यत् केवलं स्थूलशरीरं चैतन्यरहितं भवति । यदा आत्मा शरीरे तिष्ठति तदा चैतन्ययुक्तं कथ्यते । यदा च आत्मा शरीरान्निर्गच्छति तदा तत् चैतन्यरहितं मृतशरीरं कथ्यते । चैतन्यविशिष्टत्वकारणात् सः अतिवाहिकदेहः नव नव शरीरं प्राप्नोति । इयं प्रक्रिया कियत्कालपर्यन्तं प्रचलिष्यति इति विषये उच्यते –

सूक्ष्मास्तेषां नियता [20] ।।

सूक्ष्मशरीरस्य संबन्धः सर्गादेः महाप्रलयपर्यन्तं प्रचलति । एतयोः कालयोः मध्ये जीवस्य स्थूलशरीरं केवलं मृणाति । मृत्वापि सूक्ष्मशरीरं कर्मसंस्कारं प्राप्य पुनरन्यत्र जायते । इति –

अन्तः करणधर्मत्वं धर्मादीनाम् [21] ।।

धर्माधर्मादिसंस्काराः केवलमन्तःकरणस्य इति कपिलो मुनिः प्रमाणत्वेन कथयति । धर्माधर्मादयः अन्तःकरणस्य अत्यन्तनाशो न भवति । कारणावस्थे अन्तःकरणे धर्मादीनां संस्कारोऽस्ति । जीवस्यैकैकस्य द्वौ भवौ स्याताम् । प्राकृतिकभावः, वैकृतिकभाव इति तौ द्वौ भावौ । जन्मजन्मान्तरसंस्काराज्जायमानः प्राकृतिकः । कर्मानुष्ठानद्वारा प्राप्तः वैकृतिकः ।

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः [22] ।।

अस्यां कारिकायां पूर्वजन्मनः प्रमाणं दत्वा भावबिषये सूच्यते । प्रकृतजन्मनि क्रियमाणाः धर्मादिभावाः वैकृतिकाः । यदा आत्मा अन्यत्र जीवशरीरं धारयति तदा ते भावाः प्राकृतिकाः । एतादृशधर्मादिभावविशिष्टा अन्तःकरणबुद्धिरिति कथ्यते ।

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् 23 ।।

अस्यामन्तःकरणबुद्धौ अष्टौ भावाः सन्ति । ते च क्रमशः – धर्मः, ज्ञानं, वराग्यं, ऐश्वर्यं, अधर्म, अज्ञानं, रागः, अनैश्वर्य च । तत्र प्रथम चत्वारः तु प्राकृतिकाः सांसिद्धिकाः । इतरे चत्वारः वैकृतिकाश्च भवन्ति । अधर्मादयो वैकृतिका भवन्ति । यतो हि जीवः यदा कर्म करोति तत् शुक्लकृष्णकर्मोच्यते । न कोऽपि जीवः सर्वदा शुक्लकृष्णकर्म करोति । संसारे कोऽपि सदैव सुखी नास्तीत्येतदेवास्य कारणम् । एतदनुगुणं सूत्रं भवति - " कुत्रापि कोऽपि सुखीति " [24] शनैः शनैरेते भावाः मनसि दृढाः सन्तः अथवा दृढतामेत्य परजन्मनि प्राकृतिकरूपेण पुनः प्रसरन्ति ।

रूपैः सप्तभिरात्मानं बध्नाति प्रधानं ....[25] ।।

प्रधानो जीवः धर्माधर्मज्ञानानैश्वर्यरागादि सप्तभावैः बद्धो भवति । एतेषां संतापेन जीवः स्वकीयप्रारब्धफलभोगाय पुनः पुनः शरीरं प्राप्नोति, इति –

चक्रभ्रमणवद् धृतशरीरः[26] ।।

जीवः कुलालचक्रमध्यस्थवत् पुनः पुनः शरीरं प्राप्नोति । तस्य को हेतुरित्युच्यते –

" सुखदुःखसाक्षात्कारादि येन सुक्ष्मशरीरेण तत् निरुपभोगम्" [27] । अतो जीवः स्वस्य प्रारब्धकर्मफलभोगायैव पुनर्जायते । एतादृशः पवमानावयवयुक्तः अतिवाहिकदेहरूपी आत्मा प्रजापतिरूपेण उपनिषदि स्तूयते –

प्रजापतिश्चरति गर्भे त्वमेव प्रतिजायसे [28] ।।

सांख्यदर्शनानुसारं जीवस्य लोकोत्तरगतिः -
संसारे जीवस्य अस्तीत्वविषये सदैव शङ्का जायते । केषांचनमते मृत्योरनन्तरं जीवस्य सत्ता नास्ति केषांचनमते तु अस्तीति । ज्ञानीनां कृते त्वस्तीति । कदाचित् नचिकेताः यमं पृष्टवान् ।

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके [29] ।।

मरणानन्तरं गच्छति पुनः कस्मादागच्छति इति प्रष्टुराशयः । अत्र अस्माभिः ज्ञायते यत् जन्मनः पूर्वमनन्तरं च आत्मा सूक्ष्मशरीरे तिष्ठति । सूक्ष्मदेहधारिणो जीवस्य मरणकाले का गतिर्भवति, इति विषये उच्यते –

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेबरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः [30] ।।

अर्थात् जीवस्य अन्तिमभावानुसारं तस्य गतिर्भवतीत्यर्थः । तथा च सद्भावानुसारं सद्गतिरसद्भावानुसारं चासद्गतिर्भवति । पुनश्चास्मिन्विषये कालस्याधिकं महत्त्वं वितरन् वदति -

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं जोतिर्योगी प्राप्य निवर्तते [31] ।।

जीवस्य लोकल्लोकान्तरगतिर्भवति । कदाचिद् ब्रह्मलोकः कदाचिद्विष्णुलोकः कदाचिद् शिवलोकः प्राप्यते । तत्र चन्द्रलोकस्य अस्थायित्वविषये प्रतिपाद्यते । ये जीवाः चन्द्रलोकं गच्छन्ति ते क्षीणपुण्याः संपुर्णफलक्षयेन संसारे प्राप्तपुनर्जन्मानो भवन्ति । अस्य तु प्रमाणमेवम् –

चन्द्रादिलोकेऽप्यावृत्तिर्निमित्तसद्भावात् [32] ।।

कर्मबलात् जीवस्य चन्द्रलोकप्राप्तिः सिद्धा सती ततोऽपि प्रबलेन कालबलेन मनुष्यलोकं प्रत्यावर्तते जीवः । अस्य हेतुरपि प्रदर्श्यते –

लोकस्य नोपदेशात् सिद्धिः पूर्ववत् [33] ।।

मनुष्यलोके उपदेशमात्रेण सिद्धिर्नैव भवति । तथैव चन्द्रालोकेष्वपि उपदेशमात्रेण सिद्धिर्न भवति । अतो ये जीवाः जायमानाः सन्ति ते सर्वे तस्माल्लोकादागतवन्तः । जीवस्य चन्द्रलोकगतिविषये स्पष्टीक्रियते –

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः [34] ।।

यस्मिन् मार्गे भगवतोऽग्नेः देवतात्वं प्रातःकालस्याभिमानदेवतात्वं षण्मासात्मकोत्तरायणस्य अभिमानदेवतात्वं वर्तत तस्मिन् मार्गे ब्रह्मज्ञाः योगिजनाः नीयमानाः सन्तः ब्रह्म प्राप्नुवन्ति ।

पारम्पर्येण तत्सिद्धौ विमूक्तिश्रुतिः [35] ।।
लोकान्तरगमनविषयो न केवलं शास्त्रेषु अपि तु उपनिषद्यपि उक्तो वर्तते ।
उदान पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् [36] ।।

जीवेन क्रियमाणकर्मानुसारं लोकान्तरगतिर्भवति । यदि सः सत्त्वगुणात्मकं शुभकर्म करोति तर्हि तदनुगुणम् ऊर्धलोकं गच्छति । तमोगुणभूयिष्ठः सन् पापमाचरति चेत्तर्ह्यधोलोकं याति । मिश्रितकर्माचरिते पुनः पुनः मनुष्यलोकं गत्यन्तराभवेन आयाति ।

यदा सत्त्वे प्रवृद्धे तु प्रलयं यति देहभृत् । तदोत्तमविदां लोकानमलान् प्रतिपद्यते ।।
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते । तथा प्रलीनस्तमसि मूढयोनिषु जायते [37] ।।

एतादृशस्य जीवस्य गतिमुद्दिश्य गुणः प्रधानो भवति । प्रकृतेः त्रिगुणात्मकत्वकारणात् कर्मापि त्रिप्रकारकं भवति । तथा गतयोऽपि तिस्रो भवन्ति । यथा –

ऊर्ध्वं सत्त्वविशाला, तमोविशाला मूलतः मध्ये रजोविशाला [38] ।।

तथा च –

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्येतिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः [39] ।।

अपि च –

धर्मेण गममुर्ध्वं गमनमधस्ताद् भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः [40] ।।

ज्ञानाभावे जीवस्य गतिः संसारे कियती स्यात् ? अयं विषयोऽधुना स्पष्टीक्रियते –

आब्रह्मस्तम्बपर्यन्तं तत्कृते सृष्टिराविवेकात् [41] ।।

ब्रह्मणः आरभ्यः तृणापरपर्यायस्तम्बपर्यन्तं जावस्य लौकिकपारलौकिकगती भवतः । तत्रत्यप्रभेदोऽपि प्रतिपाद्यते । दैवादि प्रभेदा [42] सूत्रेणानेन जीवानां त्रिविधाः योनिसंबन्धाः सूच्यन्ते । ता योनयश्च देवतिर्यगमनुष्यात्मिकाः । एताः योनयः भौतिकसर्गसंबन्धाः । यथा –

अष्टविकल्पो देवस्तैर्यग्योनश्च पञ्चधा भवति ।
मानुष्यश्चेकविधः समासतो भौतिकः सर्गः [43] ।।

प्राप्तविविधयोनिर्जीवः लोकलोकान्तरगतिं लभते । जीवस्य गतिराश्चर्यपूर्णा इत्यमुं विशदयति ।

यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामां स्तस्मादात्मजं ह्यर्चयेद् भूतिकामः [44]
।।

उपसंहारः

अनेन अवलोकेन अस्माभिः ज्ञायते यत् मृत्योरनन्तरमपि जीवः अतिवाहिकदेहः धृत्वा पूर्ववत् अस्मिन् संसारे विचरति । अयं अतिवाहिकदेहः एतादृशी एकं अवस्था, यत्र जीवः केवलं ज्ञानेन्द्रियजन्यं वासनारूपि शरीरः धारयति । परन्तु स्थुलेन्द्रियाभावात् सः जीवः किमपि कार्यं कर्त्तुं असमर्थः स्यात् । एवंविधः वहु कालान्तरं पश्चात् प्राप्ते अवसरे च परलोकगन्तुं समर्थोः भवति जीवः । अतः स्पष्ट्यते यत् प्रत्यक्षे अप्रत्यक्षे वा जीवस्य स्थितिः संसारे ध्रुवसत्यं यावत् पर्यन्तं स्वाभाविकमृत्युः कालः न आयाति ।

सहायक ग्रन्थसूची


1. सांख्यकारिका पं. श्रीशिवनारायणशास्त्री चौखम्बा विद्याभवन प्रकाशन जवाहर नगर,वाराणसी 2001
2. सांख्यदर्शन प्रवचनभाष्य डॉ. रामशंकर भट्टाचार्यः भारतीय विद्याभवन दिल्ली 1994
3. मनुस्मृति हरगोविन्द शास्त्री चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली 2008
4. युक्तिदीपिका रमाशंकर त्रिपाठी चौखम्बा संस्कृत सीरिज आफिस् वाराणसी 2012
5. कल्याण.परलोक एवं पुनर्जन्माङ्क गीताप्रेस गोरखपुर 2012
6. ईशादि नौपनिषद् गीताप्रेस गोरखपुर 2012
7. श्रीमद्भगवद्गीता हरिकृष्ण गोयन्दका गीताप्रेस गोरखपुर 2006
8. गरुडपुराण गीताप्रेस गोरखपुर 2011
9. सांख्यतत्त्वकौमुदी डॉ. ओमप्रकाश पाण्डेय कृष्णदास अकादमी गोपाल मन्दीर लेन वाराणसी 1981


**End Notes:**

1. सांख्यकारिका 15
2. सांख्यसूत्र 3/5
3. सांख्यसूत्र 2/9
4. सांख्यसूत्र 2/15
5. कल्याण.परलोक एवं पुनर्जन्माङ्क पृ.139

6. कल्याण.परलोक एवं पुनर्जन्माङ्क पृ.139
7. गरुडपुराण पृ.109
8. सांख्यसूत्र 3/7
9. सांख्यसूत्र 3/17
10. सांख्यदर्शन पृ.409
11. सांख्यसूत्र 5/103
12. सांख्यसूत्र 5/89
13. सांख्यदर्शन पृ.410
14. मनुस्मृति 1/17
15. सांख्यदर्शन पृ.680
16. युक्तिदीपिका पृ.39
17. कठोपनिषद् 1/2/22
18. कठोपनिषद् 1/2/18
19. सांख्यसूत्र 3/21
20. सांख्यकारिका 35
21. सांख्यसूत्र 5/25
22. सांख्यकारिका 43
23. सांख्यकारिका 35
24. सांख्यसूत्र 6/7
25. सांख्यसूत्र 3/83
26. सांख्यसूत्र 3/82
27. सांख्यतत्त्वकौमुदी पृ. 226
28. प्रश्नोपनिषद्. 2/7
29. कठोपनिषद्. 1/1/30
30. भगवद्गीता. 8/6
31. भगवद्गीता. 8/25
32. सांख्यसूत्र 6/56
33. सांख्यसूत्र 6/57
34. भगवद्गीता 8/24
35. सांख्यसूत्र 6/58
36. प्रश्नोपनिषद् 3/8
37. भगवद्गीता 14/14-15
38. सांख्यसूत्र 3/48-50
39. भगवद्गीता 1418
40. सांख्यकारिका 44
41. सांख्यसूत्र 3/47
42. सांख्यसूत्र 3/46
43. सांख्यकारिका 53
44. मूण्डोकपनिषद् 3/2/10